**संस्कृत वार्ता:**

**दिनाङ्क : 26/07/2026**

**सायम् - 06:20**

**आदौ मुख्यवार्ता:**

- विकसित-वाइब्रेन्ट-विलेज्'-प्रोग्राम इत्याख्ये कार्यक्रमे प्रधानमन्त्रिणः उद्बोधनम्, सामूहिक-सहभागितायाः वैशिष्ट्यम् तेन प्रख्यापितम् ।
- कारगिल-विजय-दिवसावसरे प्रधानमन्त्री प्रभृतितयः हुतात्मवीरेभ्यः श्रद्धांजलिं समार्पयन्। प्रधानमन्त्रिणा अद्य कारगिल-विजय-दिवसे राष्ट्रस्य अतुल्य हुतात्मपुरुषा: ससम्भ्रमं संस्मृता:, प्रोक्तं च यत् देशाय तेषां महा-बलिदानम् सर्वान् गौरवपूर्णान् करोति।
- मातृभूमेः रक्षणाय हुतात्म-वीरेभ्यः राष्ट्रपत्यादिभिः भावाञ्जलिः समर्पितः ।
- कृष्ण-सागर-मार्गेषु पोत-सेवायाः पूर्वं सुरक्षा-संकटं परीक्षणाय विदेश मन्त्रालयस्य भारतीयानां कृते तीव्र-संचेतना।
- ग्लास्गो-नगरे समायोजितासु राष्ट्रमण्डल-क्रीडासु ऋषिकान्त-सिंह-चनम्बम् षष्ठी-किलोग्राम-भारोत्तलन-स्पर्धायाम् अनुपमं कौशलं प्रदर्श्य रजत-पदकं समुपार्जितवान्।
- पुरूष-क्रिकेट्-क्रीडा-श्रृंखलायां भारत-जिम्बाब्वे देशयोर्मध्ये विंशति प्रति-विंशतिः अन्ताराष्ट्रिय-श्रृंखलायाः तृतीया स्पर्धा अद्य हरारे नगरे प्रचलति।

**अथ वार्ता: विस्तरेण**

**प्रधानमंत्री- वीबी**

प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत्, भारतस्य सांस्कृतिकमूल्येषु सामूहिकसहभागित्वं सर्वदा बलस्य स्रोतः अस्ति। श्रीमोदी अद्य दृश्य-श्रव्य-माध्यमेन षड्विंशत्यधिक द्विसहस्रतमवर्षस्य विकासित-वाइब्रेन्ट-विलेज्-प्रोग्रामेत्यस्य प्रतिभागिभिः सह वार्तालापावधौ उक्तवान्।

**प्रधानमंत्री-मन की बात**

अद्य 'कारगिल-विजय-दिवसावसरे प्रधानमन्त्री नरेन्द्र-मोदी राष्ट्रस्य अतुल्य-पराक्रमिणः शौर्य-पुरुषान् ससम्भ्रमं सस्मार। तेन उद्घोषितं यत् भारतम् अद्य निरन्तरं नूतनान् उच्च-शिखरान् आरोहति, तत् यथा सैन्य-उत्पादने , सैन्य-निर्याते , अथवा मित्र-

राष्ट्रैः सह राजनैतिक-सहयोगे भवतु। आकाशवाण्याः 'मन की बात' इति कार्यक्रमे देशवासिनः सम्बोधयन् श्रीमोदी आह यत् अद्य 'जुलाई'-मासस्य षड्विंशतिः दिनाङ्को वर्तते, यो हि सा तिथिः यस्याः स्मरणाय कस्यापि पञ्चाङ्गस्य आवश्यकता नैव भवति, यतो हि अद्य सम्पूर्णे राष्ट्रे कारगिल-विजय-दिवसः परिपाल्यते।

श्रीमोदी न्यगादीत् यत् भारतम् अश्रान्तं स्वकीयस्य प्राविधिक-सामर्थ्यस्य सुदृढीकरणं विदधाति। तेन भारतीय-नौसेनायाम् 'आई.एन.एस. महेन्द्रगिरि' इति पोतस्य नूतन-प्रवेशः विशेषतः श्लाघितः। प्रधानमन्त्रिणा प्रोक्तं यत् गत रविवासरे 'विक्रम-१' इति उपग्रह-प्रक्षेपकस्य सफल-प्रक्षेपणानन्तरं प्रत्येकं भारतीयः गर्व-गौरवेण परिपूर्णः अस्ति। 'कैच् द रेन्' इति- वर्षा-जल-सङ्ग्रहः अभियानमधिकृत्य भाषमाणः श्रीमोदी सहर्षम् अब्रवीत् यत् 'जुलाई'-मासस्य चतुर्थ-दिनाङ्कात् आरभ्य सम्पूर्णे देशे विशिष्टं एकम् राष्ट्र-व्यापी-अभियानम् अविरतं प्रचलति।

अद्य 'मन की बात' इति मनोगतं कार्यक्रमे प्रधानमन्त्री अवोचत् यत् कतिपय-दिवसेभ्यः पूर्वं 'ग्लास्गो'-नगरे प्रारब्धासु 'राष्ट्रमण्डल-क्रीडासु' सहभागिनं प्रति-एकं क्रीडकं प्रति-एकः भारतीयः जयघोषं करोति। अनेनैव सह तेन 'विज्ञान-ओलम्पियाड्'-स्पर्धानाम् उल्लेखो विहितः, यत्र विपुला सङ्ख्यकानां छात्राणां सहभागिता भवति। अस्मिन् संस्करणे प्रधानमन्त्रिणा काश्मीरस्य पारम्परिक- 'वागु'-कटस्य चर्चा कृता। श्रीमोदिना प्रोक्तं यत् देशः सम्प्रति 'लोकल-फार-वोकल' (स्थानीय-वस्तूनां प्रोत्साहनम्) इति मन्त्रेण सह अग्रे सरति। गणेशोत्सव-अवसरे पी.ओ.पी.-निर्मित-प्रतिमानां स्थाने स्वादेशी-मृत्तिका-निर्मितानां गणेश-प्रतिमानाम् एव अर्चनं विधातुं तेन पुनरपि आह्वानं कृतम्। अवधेयं यत् , श्वः 'जुलाई'-मासस्य सप्तविंशे दिनाङ्के 'भारत-रत्न'-विभूषितस्य डा. ए. पी. जे. अब्दुल-कलामस्य पुण्य-तिथिः अस्ति। प्रधानमन्त्रिणा अभिहितं यत् डा. कलामस्य व्यक्तित्वे बहवः प्रेरणादायिनः पक्षाः समाहिताः आसन्, तथापि 'शिक्षकस्य' भूमिका तस्य हृदयस्य निभृत-समीपे आसीत्। सम्बोधनस्य समापने अगस्त-मासस्य पञ्चदशे दिनाङ्के आचरणीयस्य स्वातन्त्र्य-दिवसस्य चर्चां कुर्वन् तेन सर्वेभ्यः स्वकीयाः नूतनाः विचाराः परामर्शाश्च 'माई-गव्' मञ्चे प्रेषयितुम् साग्रहं प्रार्थितम्।

**विराम**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।**

**कारगिल विजय दिवस**

नवनवत्युत्तरनवदश तमे वर्षे संवृत्ते कारगिल-समरे मातृभूमेः संरक्षणाय वीरगतिं गतानां भारतीय-सैनिकानाम् अतुल्य-वीरतायाः सम्माननाय अद्य सम्पूर्णे देशे 'कारगिल-विजय-दिवसः' परिपाल्यते। अयं दिवसः अस्मिन् सङ्ग्रामे पाकिस्तानस्य उपरि भारतस्य ऐतिहासिक-विजयस्य तथा 'ऑपरेशन-विजय' इति सैन्य-अभियानस्य सफल-समाप्तेः सप्तविंशतितमं वार्षिकोत्सवं व्यञ्जयति। अभियानावधौ भारतीय-सैन्य-बलैः जम्मू-काश्मीरस्य कारगिल-जनपदे पाकिस्तानीय-सैनिकैः आतङ्कवादिभिश्च अनुप्रविष्टान् भू-भागान् पुनरपि स्व-वशं समानीतम्। अत्रावसरे राष्ट्रपतिपदासीना द्रौपदी-मुर्मू, उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्र-मोदी, गृहमन्त्री अमित-शाहः, लोकसभाध्यक्षः ओम्-बिडला च मातृभूमेः रक्षणाय समराङ्गणे प्राणाहुतिं कृतवद्भ्यः

हुतात्मभ्यः वीर-सैनिकेभ्यः भावपूर्णं श्रद्धांजलिं समर्पितवन्तः। सामाजिकान्तर्जालीय पटले स्वकीय-सन्देशे राष्ट्रपतिः मुर्मुः प्रोक्तवती यत् सैनिकानाम् अतुलनीयं शौर्यम्, अविचलः सङ्कल्पः, परम-देशभक्तिश्च भारतीय-सशस्त्र-सेनानाम् पारम्परिक-गरिमाणं निदर्शयन्ति।

## विदेश मंत्रालय-परामर्श

विदेश-कार्य-मन्त्रालयेन अद्य एका सुरक्षा-परामर्श-विज्ञप्तिः प्रसारिता, यस्यां कृष्ण-सागर-क्षेत्रे सञ्चरत्सु अथवा तद्-द्वारा प्रवहत्सु वाणिज्यिक-पोतेषु सेवा-नियोजनम् इच्छन्तः भारतीय-नागरिकाः एतादृश-दायित्व-स्वीकरणात् पूर्वं प्रवृत्त-सुरक्षा-सङ्कटस्य सूक्ष्मेक्षिकया परीक्षणं कुर्युः इति साग्रहम् उद्बोधिताः। परामर्श-पत्रे स्पष्टीकृतं यत् ये जनाः एतादृशं सेवा-कार्यम् अङ्गीकुर्वन्ति, तैः अतिशयित-सावधानता परिपालनीया।मन्त्रालयेन प्रोक्तं यत् सशस्त्र-सङ्घर्षस्य कारणात् कृष्ण-सागरस्य तस्य समीपवर्तिनां सामुद्रिक-क्षेत्राणाञ्च सुरक्षा-स्थितिः अतीव अस्थिरा आशङ्काकुला च वर्तते।

## जम्मू-कश्मीर-स्कूल

जम्मू-कश्मीर-राज्ये शासन-पक्षेण समादिष्टं यत् सम्प्रति प्रवृत्त-अतिवृष्ट्या यानि पाठशाला-भवनानि असुरक्षितानि क्षतग्रस्तानि वा सञ्जातानि, तानि सद्यः पिहितानि क्रियन्ताम्; यावत् च आवश्यक-पुनरुद्धार-कार्याणि न पूर्यन्ते, तावत् तेषाम् उपयोगः सर्वथा वर्जितो भवेत्। जम्बू-मण्डलस्य मण्डलायुक्तः रमेश-कुमारः आपत्तिं समीक्षितुम् एतान् कठोर-निर्देशान् प्रासारयत्। अत्रान्तरे, अस्मिन्नेव मासे नवदश-दिनाङ्कात् आरभ्य पुञ्छ-राजौरी-डोडा-रामबन-जनपदेषु अतिवृष्टि-सम्भूतासु आपत्सु ऊनत्रिंशत् जनाः मृत्युमुपगताः , षट् जनाः च सम्प्रति यावत् अज्ञाताः सन्ति। जुलाई मासस्य एकोनत्रिंशत्-त्रिंशत्-दिनाङ्कयोः पुनः अति-वृष्टेः पूर्वानुमानम् आलोक्य, आपद्-ग्रस्तेषु संवेदनशीलेषु क्षेत्रेषु च अत्यावश्यक-वस्तूनां पर्याप्त-सञ्चयं सुनिश्चेतुं जनपद-प्रशासनानि समादिष्टानि सन्ति।

## प्रधानमन्त्री नरेन्द्रमोदी

प्रधानमन्त्री नरेन्द्रमोदी अस्मिन् वर्षे विश्व-कनिष्ठ-चैम्पियन्शिप-क्रीडायां स्वर्णपदकाय स्क्वैश-क्रीडिकाम् अनाहत सिङ्घं अभिनन्दितवान्। सा प्रथमा भारतीया स्क्वाश्-क्रीडिका अपि अभवत् या प्रतिष्ठितं विश्व-कनिष्ठ-च्याम्पियन्शिप् उपाधिं प्राप्तवती। सामाजिक-अन्तर्जालीये पटले, श्रीमोदी एतत् ऐतिहासिक-उपलब्धिः इति वर्णितवान्, तथा च उक्तवान् यत् एषा उपलब्धिः यूनां मध्ये स्क्वैश-क्रीडायाः लोकप्रियतां वर्धयिष्यति इति।

## जलशक्ति

जलशक्ति-मन्त्रालयः अवदत् यत् छत्तीसगढ-राज्यस्य राजनन्दगाव्-जनपदं, वैज्ञानिक-योजनया माध्यमेन, सामुदायिक-सहभागित्वस्य च माध्यमेन, कैच द रेन-इत्यभियानस्य, जलरक्षा-अभियानस्य च अन्तर्गतं जलसंरक्षणं कृत्वा राष्ट्रिय-अग्रगामि-रूपेण उद्भूतम् अस्ति । द्विषष्ठ्यधिकषट् शतं यावत् ग्रामेषु षष्ठी सहस्रतोप्यधिकाः जलसंरक्षणं, पुनर्भरण-संरचनाः च निर्मिताः सन्ति। पञ्चशततोप्यधिकाः निष्क्रियाः बोर्वेल्स् रीचार्ज् शाफ़्ट्स् इति रूपेण परिवर्तिताः सन्ति।

**केन्द्रीयमन्त्री प्रल्हादजोशी**

केन्द्रीयमन्त्री प्रल्हादजोशी अद्य शिक्षामन्त्रिरूपेण कार्यभारं स्वीकृतवान्। धर्मेन्द्र-प्रधानस्य त्यागपत्रस्यानन्तरं श्री-जोशी वर्यः ह्यः अस्मिन् पदे नियुक्तः अभवत्। श्रीजोशी उपभोक्तृकार्यं, खाद्यं तथा सार्वजनिकवितरणं, नूतनं तथा पुनर्नवीकरणीय-ऊर्जा इत्येतानि विभागानि अपि निरन्तरतया निर्वहिष्यति। कार्यभारं स्वीकृत्य शीघ्रमेव, सः विविधयोजनानां, प्रमुख-उपक्रमाणां च कार्यान्वयनस्य मूल्याङ्कनं कर्तुं शिक्षा-मन्त्रालयस्य समीक्षा-सभायाः अध्यक्षतां कृतवान्। शिक्षा-राज्यमन्त्री जयंत चौधरी, मन्त्रालयस्य अनेके वरिष्ठाः अधिकारिणः च अस्यां सभायां उपस्थिताः आसन्।

**क्रिकेट्**

पुरूष-क्रिकेट्-क्रीडा-श्रृंखलायां भारत-जिम्बाब्वे देशयोर्मध्ये विंशति प्रति-विंशतिः अन्ताराष्ट्रिय-श्रृंखलायाः तृतीया स्पर्धा अद्य हरारे नगरे प्रचलति। भारतेन जिम्बाब्वे देशस्य सम्मुखे त्रिनवत्यधिकैकशत धावनांकानां लक्ष्यम् उपस्थापितम्।

**राष्ट्रमंडल खेल**

अद्यत्वे प्रचलितासु राष्ट्रमण्डल-क्रीडासु भारतस्य ऋषिकान्तसिङ्घ् चनम्बम् इत्येषः ग्लास्गो-नगरे पुरुषाणां षष्ठी कि. ग्रा. मितायां भारोत्तोलन-स्पर्धायां रजतपदकं प्राप्तवान्।

**॥ इति वार्ताः ॥**